


प्र॒जाप॑ति॒र्वरु॑णा॒याश्व॑मनयत्,

सः स्वान्दे॒वता॑माच्र्छत्, सः पर्य॑दीर्यत,






स ए॒तँव्वा॑रु॒णञ्चतु॑ष्कपालमपश्य॒त्, तं निर॑वपत्,







ततो॒ वै स व॑रुणपा॒शाद॑मुच्यत । वरु॑णो॒ वा ए॒तङ्गृ॑ह्णाति॒
योऽश्वं॑म्प्रतिगृ॒ह्णाति॑ याव॒तो॑ऽश्वा॒न्प्रतिगृ॒ह्णी॒यात्ताव॑तो
वा॒रु॒णाञ्चतु॑ष्कपाला॒न्निर्व॑पेत् वरु॑णमे॒व स्वेन॑ भाग॒धेये॒नोप॑ धावति
स ए॒वैनँ॑व्वरुणपा॒शान्मु॑ञ्चतिचतु॑ष्कपाला भवन्ति॒
चतु॑ष्पा॒द्ध्यश्व॒स्समृ॑द्ध्यै ॥





